# Shri Padmavatistotram 2

# શ્રીપદ્માવતીસ્તોત્રમ્ ૨

## Document Information

Text title : padmAvatIstotram 2

File name : padmAvatIstotram2.itx

Category : devii, devI, jaina

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# Shri Padmavatistotram 2

## શ્રીપદ્માવતીસ્તોત્રમ્ ૨

શ્રીમદ્ગીર્વાણચક્રસ્ફુટમુકુટતટીદિવ્યમાણિક્યમાલા-
જ્યોતિર્જ્વાલાકરાલાસ્ફુરિતમુકુરિકાધૃષ્ટપાદારવિન્દે !
વ્યાઘોરોલ્કાસહસ્રસ્ફુરજ્જ્વલનશિખાલોલપાશાઙ્કુશાઢ્યે
ૐ આઁ ક્રૌઁ હ્રીઁ મન્ત્રરૂપે ! ક્ષપિતકલિમલે ! રક્ષ માં દેવિ ! પદ્મે ॥ ૧॥

ભિત્ત્વા પાતાલમૂલં ચલચલચલિતે ! વ્યાલલીલાકરાલૈ-
ર્વિશુદ્દણ્ડચણ્ડમપ્રહરણસહિતૈસ્તદ્દૂભુત્રૈસ્તર્જયન્તી ।
દૈત્યેન્દ્રક્રૂરદંષ્ટ્રાકટકટઘટિતે ! સ્પષ્ટભીમાટ્ટહાસે !
માયાજીમૂતમાલાકુહરિતગગને ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૨॥

કૂજત્કોદણ્ડકાણ્ડોડુમરવિધુરિતે ! ક્રૂરઘોરોપસર્ગં
દિવ્યં વજાતપત્રં પ્રગુણમણિરણત્કિઙ્કિણીક્વાણરમ્યમ્ ।
ભાસ્વદ્વૈડૂર્યદણ્ડં મદનવિજયિનો વિભ્રતી પાર્શ્વભર્તુઃ
સા દેવી પદ્મહસ્તા વિઘટયતુ મહાડામરં મામકીનમ્ ॥ ૩॥

ભૃઙ્ગી કાલી કરાલી પરિજનસહિતે ! ચણ્ડિ ચામુણ્ડિ નિત્યે !
ક્ષાં ક્ષીં ક્ષૂં ક્ષઃ ક્ષણાર્ધે ક્ષ્ઃઅતરિપૂનિવહને ! હ્રીં મહામન્ત્રરૂપે ! ।
ભ્રાં ભ્રીં ભ્રૂં ભૃઙ્ગસઙ્ગભ્રુકુટિપુટતટશસિતોદ્દામદૈત્યે !
ઝ્વાં ઝ્વીં ઝ્વૂં ઝ્વઃ પ્રચણ્ડે ! સ્તુતિશતમુખરે !
રક્ષ માં દેવિ ! પદ્મે ! ॥ ૪॥

ચઞ્ચત્કાઞ્ચીકલાપે ! સ્તનતટવિલુઠત્તારહારાવલીકે !
પ્રોત્ફુલ્લત્પારિજાતદ્રુમકુસુમમહામઞ્જરીપૂજ્યપાદે ! ।
હ્રાં હ્રીં ક્લીં બ્લૂઁ સમેતે ભુવનવશકરે ! ક્ષોભિણી દ્રાવિણી ત્વં
આં ઈં ઊં પદ્મહસ્તે ! કુરુ કુરુ ઘટને રક્ષ માં દેવિ ! પદ્મે ! ॥ ૫॥

લીલાવ્યાલોલનીલોત્પલદલનયને ! પ્રજ્વલદ્વાડવાગ્નિ-
પ્રોદ્યજ્જ્વાલાસ્ફુલિઙ્ગસ્ફુરદરુણકરોદગ્રવજ્જાગ્રહસ્તે ! ।
હ્રાઁ હ્રીઁહૂઁ હ્રઃ હરન્તી હરદ્વરહરહુઙ્કારભીમૈકનાદે !

પદ્મે ! પદ્માસનસ્થે વ્યપનય દુરિતં દેવિ ! દેવેન્દ્રવન્દ્યે ! ॥ ૬॥

કોપં વં ઝં સહસઃ કુવલયકલિતોદ્દામલીલાપ્રબન્ધે !
જ્રાં જ્રીં જ્રૂં જ્રઃ પવિત્રે શશિકરધવલે પ્રક્ષરત્ક્ષીરગૌરે ! ।
વ્યાલવ્યાબદ્ધજૂટે પ્રબલબલમહાકાલકૂટં હરન્તી
હા હા હુઙ્કારનાદે ! કૃતકરકમલે ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૭॥

પ્રાતર્બાલાર્કરશ્મિચ્છુરિતઘનમહાસાન્દ્રસિન્દૂરધૂલી-
સન્ધ્યારાગારુણાઙ્ગિ ત્રિદશવરવધૂવન્દ્યપાદારવિન્દે ! ।
ચઞ્ચચ્ચન્દ્રાસિધારાપ્રહતરિપુકુલે કુણ્ડલોદ્ધૃષ્ટગલ્લે !
શ્રાં શ્રીં શ્રૂં શ્રઃ સ્મરન્તી મદગજગમને !
રક્ષ માં દેવિ ! પદ્મે ! ॥ ૮॥

વિસ્તીર્ણે પદ્મપીઠે કમલદલનિવાસોચિતે કામગુપ્તે
લાન્તાઙ્ગીશ્રીસમેતે પ્રહસિતવદને દિવ્યહસ્તે । પ્રસન્ને ! ।
રક્તે રક્તોત્પલાઙ્ગિ પ્રતિવહસિ સદા વાગ્ભવં કામરાજં
હંસારૂઢે ! ત્રિનેત્રે ! ભગવતિ ! વરદે ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૯॥

ષટ્કોણે ચક્રમધ્યે પ્રણતવરયુતે વાગ્ભવે કામરાજે
હંસારૂઢે સવિન્દૌ વિકસિતકમલે કર્ણિકાગ્રે નિધાય ।
નિત્યે ક્લિન્ને મદદ્રૈર્દ્રવ ઇતિ સહિતં સાઙ્કુશે પાશહસ્તે !
ધ્યાનાત્સઙ્ક્ષોભકારિત્રિભુવનવશકૃદ્ રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૦॥

આં ક્રોં હ્રીં પઞ્ચબાણૈર્લિખિતષટ્દલે ચક્રમધ્યે સહંસઃ
હ્ર્સ્ક્લીઁ શ્રીં પત્રાન્તરાલે સ્વરપરિકલિતે વાયુના વેષ્ટિતાઙ્ગી ।
હ્રીં વેષ્ટે રક્તપુષ્પૈર્જપતિ મણિમતાં ક્ષોભિણી વીક્ષ્યમાણા
ચન્દ્રાર્કં ચાલયન્તી સપદિ જનહિતે રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૧॥

ગર્જન્નીરદગર્ભનિર્ગતતડિરુજ્જ્વાલાસહસ્રસ્ફુરત્-
સદ્વજાઙ્કુશપાશપઙ્કજધરા ભક્ત્યામરૈરર્ચિતા ।
સદ્યઃ પુષ્પિતપારિજાતરુચિરં દિવ્યં વપુર્બિભ્રતી
સા માં પાતુ સદા પ્રસન્નવદના પદ્માવતી દેવતા ॥ ૧૨॥

જિહ્વાગ્રે નાસિકાન્તે હૃદિ મનસિ દૃશોઃ કર્ણયોર્નાભિપદ્મે
સ્કન્ધે કણ્ઠે લલાટે શિરસિ ચ ભુજયોઃ પૃષ્ઠિપાર્શ્વપ્રદેશે ।
સર્વાઙ્ગોપાઙ્ગશુદ્ધ્યાન્યતિશયભવનં દિવ્યરૂપં સ્વરૂપં
ધ્યાયામઃ સર્વકાલં પ્રણયલયગતં પાર્શ્વનાથેતિશબ્દમ્ ॥ ૧૩॥

બ્રહ્માણી કાલરાત્રી ભગવતિ વરદે ! ચણ્ડિ ચામુણ્ડિ નિત્યે
માતઙ્ગી ગૌરિધારી ધૃતિમતિવિજયે કીર્તિહ્રીંસ્તુત્યપદ્મે ! ।
સઙ્ગ્રામે શત્રુમધ્યે જલજ્વલનજલે વેષ્ટિતે તૈઃ સ્વરાસ્ત્રૈઃ
ક્ષાં ક્ષીં ક્ષૂં ક્ષઃ ક્ષણાર્ધં ક્ષતરિપુનિવહે !
રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૪॥

ભૂવિશ્વેક્ષણચન્દ્રચન્દ્રપૃથિવીયુગ્મૈકસઙ્ખ્યાક્રમા-
ચ્ચન્દ્રામ્ભોનિધિબાણષણ્મુખવશં દિક્ખેચરાશાદિષુ ।
ઐશ્વર્યં રિપુમારવિશ્વભયકૃત્ક્ષોભાન્તરાયા વિષાઃ
લક્ષ્મીલક્ષણભારતીગુરુમુખાન્મન્ત્રાનિમા દેવતે ! ॥ ૧૫॥

ખડ્ગૈઃ કોડણ્ડકાણ્ડૈર્મુશલહલકિણૈર્વજ્રનારાચચક્રૈઃ
શક્ત્યા શલ્યૈસ્ત્રિશૂલૈર્વરફરશફલૈર્મુદ્ગરૈર્મુષ્ટિદણ્ડૈઃ ।
પાશૈઃ પાષાણવક્ષૈર્વરગિરિસહિતૈર્દિવ્યશસ્ત્રૈરમાનૈ-
ર્દુષ્ટાન્ સંહારયન્તી વરભુજલલિતે ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૬॥

યસ્યા દેવર્નરેન્દ્રૈરમરપગિતગણૈઃ કિન્નરૈર્દાનવેન્દ્રૈઃ
સિદ્ધૈર્નાગેન્દ્રયક્ષૈર્નરમુકુટતટૈર્ઘૃષ્ટપાદારવિન્દે ! ।
સૌમ્યે સૌભાગ્યલક્ષ્મીદલિતકલિમલે ! પદ્મકલ્યાણમાલે !
અમ્બે ! કાલે સમાધિં પ્રકટય પરમં રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૭॥

ધૂપૈશ્ચન્દનતણ્ડુલૈઃ શુભમહાગન્ધૈઃ સમન્ત્રાલિકૈ-
નાનાવર્ણફલૈર્વિચિત્રસરસૈર્દિવ્યૈર્મિનોહારિભિઃ ।
પુષ્પૈર્નૈવેદ્યવસ્ત્રર્મનભુવનકરા ભક્તિયુક્તૈઃ પ્રદાતા
રાજ્યે હેત્વં ગૃહાણે ભગવતિ વરદે ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૧૮॥

ક્ષુદ્રોપદ્રવરોગશોકહરણી દારિદ્ય વિદ્રાવણી
વ્યાલવ્યાઘ્રહરા ફણત્રયધરા દેહપ્રભાભાસ્વરા ।
પાતાલાધિપતિપ્રિયા પ્રણયિની ચિન્તામણિઃ પ્રાણિનાં
શ્રીમત્પાર્શ્વજિનેશશાસનસુરી પદ્માવતી દેવતા ॥ ૧૯॥

તારા ત્વં સુગતાગમે ભગવતી ગૌરીતિ શૈવાગમે
વજ્રા કૌલિકશાસને જિનમતે પદ્માવતી વિશ્રુતા ।
ગાયત્રી શ્રુતશાલિનાં પ્રકૃતિરિત્યુક્તાસિ સાઙ્ખયાગમે
માતર્ભારતિ ! કિં પ્રભૂતભણિતૈર્વ્યાપ્તં સમસ્તં ત્વયા ॥ ૨૦॥

પાતાલે કૃશતા વિષં વિષધરા ધૂર્મન્તિ બ્રહ્માણ્ડજાઃ
સ્વર્ભૂમીપતિદેવદાનવગણાઃ સૂર્યેન્દવો યદ્ગુણાઃ ।
કલ્પેન્દ્રાઃ સ્તુતિપાદપઙ્કજનતા મુક્તામણિં ચુમ્બિતા
સા ત્રૈલોક્યનતા મતા ત્રિભુવને સ્તુત્યા સ્તુતા સર્વદા ॥ ૨૧॥

સઞ્જપ્તા કણવીરરક્તકુસુમૈઃ પુષ્પૈઃ સમં સઞ્ચિતૈઃ
સન્મિશ્રૈર્ધૃતગુગ્ગુલૌઘમધુભિઃ કુણ્ડે ત્રિકોણે કૃતે ।
હોમાર્થં કૃતષોડશાઙ્ગુલશતા વહ્નૌ દશાંશૈર્જપેત્
તં વાચં વચસીહ દેવિ ! સહસા પદ્માવતી દેવતા ॥ ૨૨॥

હ્રીઙ્કારૈશ્ચન્દ્રમધ્યે પુનરપિ વલયં ષોડશાવર્ણપૂર્ણૈ-
ર્બાહ્યા કણ્ઠૈરવેષ્ટ્ય કમલદલયુતં મૂલમન્ત્રપ્રયુક્તમ્ ।
સાક્ષાત્ત્રૈલોક્યવશ્યં પુરુષવશકૃતં મન્ત્રરાજેન્દ્રરાજં
....એતત્સ્વરૂપં પરમપદમિદં પાતુ માં પાર્શ્વનાથઃ ૨૩॥

પ્રોત્ફુલ્લત્કુન્દનાદે કમલકુવલયે માલતીમાલ્યપૂજ્યે
પાદસ્થે ભૂધરાણાં કૃતરણક્વણિતે રમ્યઝઙ્કારરાવે ।
ગુઞ્જત્કાઞ્ચીકલાપે પૃથુલકટિતટે તુચ્છમધ્યપ્રદેશે
હા હા હુઙ્કારનાદે ! કૃતકરકમલે ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૨૪॥

દિવ્યે પદ્મે સુલગ્ને સ્તનતટમુપરિ સ્ફારહારાવલીકે
કેયૂરૈઃ કઙ્કણાદ્યૈર્બહુવિધરચિતૈર્બાહુદણ્ડપ્રચણ્ડૈઃ ।
ભાભાલે વૃદ્ધતેજઃસ્ફુરન્મણિશતૈઃ કુણ્ડલોદ્ધૃષ્ટગણ્ડે
સ્રાં સ્રીં સ્રૂં સ્રઃ સ્મરન્તી ગજપતિગમને ! રક્ષ માં દેવિ ! પદ્મે ! ॥ ૨૫॥

યા મન્ત્રાગમવૃદ્ધિમાનવિતનોલ્લાસપ્રસાદાર્પણાં
યા ઇષ્ટાશયક્લૃપ્તકાર્મણગણપ્રધ્વંસદક્ષાઙ્કુડશા ।
આયુર્વૃદ્ધિકરાં જ્વરામયહરાં સર્વાર્થસિદ્ધિપ્રદાં
સદ્યઃ પ્રત્યયકારિણીં ભગવતીં પદ્માવતીં સંસ્તુવે ॥ ૨૬॥

પદ્માસના પદ્મદલાયતાક્ષી પદ્માનના પદ્મકરાઙ્ઘ્રિપદ્મા ।
પદ્મપ્રભા પાર્શ્વજિનેન્દ્રશક્તા પદ્માવતી પાતુ ફણીન્દ્રપત્ની ॥ ૨૭॥

માતઃ પ્ર પદ્મિનિ ! પદ્મરાગરુચિરે ! પદ્મપ્રસૂનાનને !
પદ્મે ! પદ્મવનસ્થિતે ! પરિલસત્પદ્માક્ષિ ! પદ્માનને ! ।
પદ્મામોદિનિ ! પદ્મકાન્તિવરદે ! પદ્મપ્રસૂનાર્ચિતે !
પદ્મોલ્લાસિનિ ! પદ્મનાભિનિલયે ! પદ્માવતી પાહિ મામ્ ॥ ૨૮॥

યા દેવી ત્રિપુરા પુરત્રયગતા શીઘ્રાસિ શીઘ્રપ્રદા
યા દેવી સમયા સમસ્તભુવને સઙ્ગીયતે કામદા ।
તારા માનવિમર્દિની ભગવતી દેવી ચ પદ્માવતી
તાસ્તાઃ સર્વગતાસ્તમેવ નિયતં માયેતિ તુભ્યં નમઃ ॥ ૨૯॥

ત્રુટ્યત્શઙ્ખલબન્ધનં બહુવિધૈઃ પાશૈશ્ચ યન્મોચનં
સ્તમ્ભે શત્રુજલાગ્નિદારુણમહીનાગારિનાશે ભયમ્ ।
દારિદ્ર્યાગ્રહરોગશોકશમનં સૌભાગ્યલક્ષ્મીપ્રદં
યે ભક્ત્યા ભુવિ સંસ્મરન્તિ મનુજાસ્તે દેવિ ! નામગ્રહમ્ ॥ ૩૦॥

ભક્તાનાં દેહિ સિદ્ધિં મમ સકલમઘં દેવિ ! દૂરીકુરુ ત્વં
સર્વેષાં ધાર્મિકાણાં સતતનિયતતં વાઞ્છિતં પૂરયસ્વ ।
સસારાબ્ધૌ નિમગ્નં પ્રગુણગણયુતં જીવરાશિં ચ ત્રાહિ
શ્રીમજ્જૈનેન્દ્રધર્મં પ્રકટય વિમલં દેવિ ! પદ્માવતિ ! ત્વમ્ ॥ ૩૧॥

દિવ્યં સ્તોત્રં પવિત્રં પટુતરપઠતાં ભક્તિપૂર્વં ત્રિસન્ધ્યં
લક્ષ્મીસૌભાગ્યરૂપં દલિતકલિમલં મઙ્ગલં મઙ્ગલાનામ્ ।
પૂજ્ય કલ્યાણમાદ્યં જનયતિ સતતં પાર્શ્વનાથપ્રસાદાદ્
દેવી પદ્માવતી નઃ પ્રહસિતવદના યા સ્તુતા દાનવેન્દ્રૈઃ ॥ ૩૨॥

પઠિતં ભણિતં ગુણિતં જયવિજયરમાનિબન્ધનં પરમમ્ ।
સર્વાધિવ્યાધિહરં જપતાં પદ્માવતી સ્તોત્રમ્ ॥ ૩૩॥

આદ્યં ચોપદ્રવં હન્તિ દ્વિતીયં ભૂતનાશનમ્ ।
તૃતીયે ચામરીં હન્તિ ચતુર્થે રિપુનાશનમ્ ॥ ૩૪॥

પઞ્ચ પઞ્ચજનાનાં ચ વશીકારં ભવેદ્ ધ્રુવમ્ ।
ષષ્ઠે ચોચ્ચાટનં હન્તિ સપ્તમે રિપુનાશનમ્ ॥ ૩૫॥

અત્યોદ્વેગા ચાષ્ટમે ચ નવમે સર્વકાર્યકૃત્ ।
ઇષ્ટા ભવન્તિ તેષાં ચ ત્રિકાલપઠનાર્થિનામ્ ॥ ૩૬॥

આહ્વાનં નૈવ જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાર્ચે નૈવ જાનામિ ત્વં ગતિઃ પરમેશ્વરિ ધ ॥ ૩૭॥

અથાહ્વાનનમ્ ।
શ્રીપાર્શ્વનાથ ! જિનનાયક ! રત્નચૂડા-

પાશાઙ્કુશોરગફલાઙ્કિતદોશ્ચતુષ્કા ।
પદ્માવતી ત્રિનયના ત્રિફણાવતંસં
પદ્માવતી જયતિ શાસનપુણ્યલક્ષ્મીઃ ॥

ૐ આઁ ક્રૌઁ અરુણવર્ણસર્વલક્ષણસમ્પૂર્ણઃ
સ્વાયુધવાહનવન્ધુચિહ્નસપરિવારાન્ નમોऽસ્તુતે હે પદ્માવતિ ! દેવિ !
અત્રાગચ્છાગચ્છ તિષ્ઠ તિષ્ઠ ઠઃ ઠઃ મમ સન્નિહિતા ભવ ભવ
વષટ્ સ્વાહા ।

અથાષ્ટકં

ૐ હ્રીં શ્રીઁ મન્ત્રરૂપે ! વિબુધજનનુતે ! દેવદેવેન્દ્રવન્દ્યે !
ચઞ્ચચ્ચન્દ્રાવદાતે ! ક્ષપિતકલિમલે ! હારનીહારગૌરે ! ।
ભીમે ! ભીમાટ્ટહાસે ભવભયહરણે । ભૈરવે ! ભીમરૂપે
હ્રાઁ હ્રીં હ્રૂઁકારનાદે ! વિશદજલભરૈસ્ત્વાં યજે દેવિ ! પદ્મે ! ॥ ૧॥

ૐ હ્રીં શ્રાઁ શ્રીઁ પદ્માવત્યૈ જલં-૧

હા પક્ષી(ક્ષિ) બીજગર્ભે સુરવરરમણીચર્ચિન્તેऽનેકરૂપે !
કોપ વં ઝં વિધેયં ધરિતતવધરે યોગિની યોગમાર્ગે ।
હં હંસઃ સ્વર્ગજૈશ્ચ પ્રતિદિનનમિતે ! પ્રસ્તુતાપાપપટ્ટે
દૈત્યેન્દ્રૈર્ધ્યાયમાને ! વિમલસલિલજૈસ્ત્વાં યજે દેવિ ! પદ્મે ! ॥ ૨॥

ગન્ધં૦ ૨

દૈત્યૈર્દૈત્યારિનાથૈર્નમિતપદયુગે ! ભક્તિપૂર્વં ત્રિસન્ધ્યં
યક્ષૈઃ સિદ્ધૈશ્ચ નમ્રૈરહમહમિકયા દેહકાન્ત્યાશ્ચ કાન્ત્યૈ ।
આં ઇં ઉં તં અ આ આ ગૃઢ ગૃઢ મૃડને સઃ સ્વરે ન્યસ્વરે નૈઃ
તેવપ્રાહીયમાને ક્ષતધવલભરૈસ્ત્વાં યજે દેવિ ! પદ્મે ! ॥ ૩॥

અક્ષતમ્ ।

ક્ષાં ક્ષીં ક્ષૂં ક્ષઃ સ્વરૂપે ! હન વિષમવિષં સ્થાવરં જઙ્ગમં વા
સંસારે સંસૃતાનાં તવ ચરણયુગે સર્વકાલાન્તરાલે ।
અવ્યક્તવ્યક્તરૂપે ! પ્રણતનરવરે ! બ્રહ્મરૂપે ! સ્વરૂપે !
પઙ્ક્તિયોગીન્દ્રગમ્યે સુરભિશુભક્રમે ! ત્વાં યજે દેવિ ! પદ્મ ! ॥ ૪॥

પુષ્પમ્ ॥

પૂર્ણં વિજ્ઞાનશોભાશશધરધવલે દાસ્યવિમ્બં પ્રસન્નૈ
રમ્યે સ્વચ્છે સ્વકાન્ત્યૈ દ્વિજકરનિકરે ચન્દ્રિકાકારભાસે ।
આસ્મિઙ્ગિન્નાભવર્જ્યાં દિનમનુસતતં કલ્મષં ક્ષાલયન્તી
શ્રાં શ્રીં શ્રૂં મન્ત્રરૂપે ! વિમલચરુવરૈસ્ત્વાં યજે દેવિ ! પદ્મે ! ॥ ૫॥

નૈવેદ્યમ્ !

ભાસ્વત્પદ્માસનસ્થે ! જિનપદનિરતે ! પદ્મહસ્તે ! પ્રશસ્તે !
પ્રાં પ્રીં પ્રૂં પ્રઃ પવિત્રે ! હર હર દુરિતં દુષ્ટજં દુષ્ટચેષ્ટે ! ।
વાચાલા ભાવભક્ત્યા ત્રિદશયુવતિભિઃ પ્રત્યહં પૂજ્યપાદે !
ચન્દ્રે ચન્દ્રીકરાલે મુનિગૃહમણિભિસ્ત્વાં યજે દેવિ પદ્મે ! ॥ ૬॥

દીપમ્ ॥

નમ્રીભૂતક્ષિતીશપ્રવરમણિતટોદ્ઘૃષ્ટપાદારવિન્દે !
પદ્માક્ષે ! પદ્મનેત્રે ! ગજપતિગમને ! હંસશુભ્રે વિમાને ।
કીર્તિશ્રીવૃદ્ધિચક્રે ! શુભજયવિજયે ! ગૌરિગાન્ધારિયુક્તે !
દી દી શરણ્યે ગુરુસુરભિભરૈસ્ત્વાં યજે દેવિ ! પદ્મે ! ॥ ૭॥

ધૂપમ્ ॥

વિદ્યુજ્જ્વાલાપ્રદીપ્તે પ્રવરમણિમયામક્ષમાલાં કરાલે
રમ્યે વૃત્તાં ધરન્તી દિનમનુસતતં મઙ્કુકં સારદં ચ ।
નાગેન્દ્રૈરિન્દ્રચન્દ્રૈર્દિવિપમનુજનૈઃ સંસ્તુતા દેવદેવિ !
પદ્માર્ચે ! ત્વાં ફલૌઘૈર્દિશતુ મમ સદા નિર્મલશર્મસિદ્ધિઃ ॥ ૮॥

ફલમ્ ॥

શ્રીમન્મહાચીનદુકૂલનેત્રે સત્ક્ષૌમકૌશેયકચીનવસ્ત્રૈઃ ।
શુભ્રાંશુકે શ્યનમનિપ્રભાઙ્ગી(? ) યજામહે પન્નગરાજદેવિ ! ॥ ૯॥

શુભ્રવસ્રમ્ ।

કાઞ્ચીસૂત્રવિનૂતરનિચિતે કેયૂરસત્કુણ્ડલૈ-
ર્મઞ્જીરાઙ્ગદમુદ્રિકાદિમુકુટપ્રાલમ્બિકાવાસકૈઃ ।
અઞ્ચચ્ચાટિકપટ્ટિકાદિવિલગદ્ગ્રૈવેયકૈર્ભૂપાણૈઃ
સિન્દૂરાઙ્ગસુકાન્તિવર્ષસુભગૈઃ સમ્પૂજયામો વયમ્ ॥ ૧૦॥

ષોડશાભરણમ્ ॥

વારિભિર્ગન્ધૈરક્ષતપુષ્પૈશ્ચરુવરદીપૈર્ધૂપફલાર્ઘૈઃ ।
ક્રૌઁ  હ્રીં શ્રીં ક્ષાં સુબીજપૂરમન્ત્રે ઝ્વીં પ્રાં ધં હું હું
યન્ત્રશુભમર્ચે ॥ ૧૧॥

અર્ઘ્યમ્ ॥

અમ્ભોભિર્દિવ્યગન્ધૈરલિકુલકલિતૈર્ગન્ધશાલ્યક્ષતૌઘૈઃ
કુન્દાદ્યૈર્દિવ્યવદ્ભિરતુલશુચિવરૈર્દીપકૈઃ કામ્યધૂપૈઃ ।
સુસ્વાદૈર્નાલિકેરૈર્વિલસિતવિમલૈર્વપ્રચક્રૈરણાર્ઘૈઃ
કલ્યાણાનાઙ્ગભાજાં વિમલગુણવતી પૂજયામીષ્ટસિદ્ધ્યૈ ॥ ૧૨॥

પૂર્ણાર્ઘ્યમ્ ॥

અથ પ્રત્યેકપૂજા ।
શ્રીસવ્યપાણિગતતીક્ષ્ણમસ્ત્રં વજ્રાયુધ નામ જગત્પ્રસિદ્ધમ્ ।
ત્રૈલોક્યવ્યામં ભયનાશનં ચ પદ્માવતિ !  ત્વત્પદમર્ચયામિ ॥ ૧॥

ૐ આઁ ક્રૌઁ હ્રીં સવ્યદ્રસ્તવજધારણે જલં ૧

ભિત્ત્વા સુપાતાલમૂલં ચ શસ્ત્રં કૃત્વા વિનાશં કલિઘોરદુઃખમ્ ।
સુવામભાગે કરમઙ્કુશં ચ અર્ચામિ શસ જનશર્મકારિ ॥ ૨॥

ઇતિ શ્રીપદ્માવતીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by DPD

*Shri Padmavatistotram 2*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*